# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-1)(New)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – सर्वदर्शनम् | **कोड –C.E.1.1.1** | समयः- 11:30 तः 2:30 |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – तर्कसङ्ग्रहः(दीपिका सहितः) | |

### प्रथमान्वितिः (Unit 1)

**प्रश्न १ अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।** १०

१ तर्कसंग्रहस्य मङ्गलाचरणं विलिख्य तस्य व्याख्या क्रियताम्।

२ सप्तपदार्थानां लक्षणानि विलिख्य अभावपदार्थं स्पष्टयत।

३ तमसः दशमद्रव्यत्वं दीपिकानुसारं निरूपयत।

**प्रश्न २ अधोलिखितेषु कस्यचिदेकस्य निबन्धात्मकम् उत्तरं प्रदीयताम्।** १०

१ भारतीयदर्शनेषु न्यायदर्शनस्य परिचयं वैशिष्ट्यं च विवर्ण्य तर्कसंग्रहस्य परिचितिं कारय।

२ यथादीपिकं मङ्गलस्य समाप्तिसाधनत्वं विशदयत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ निम्नलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं विलिख्यताम्।** १०

१ अपां लक्षणं स्वरूपं च विशदयत।

२ आत्मनः लक्षणं स्वरूपं च प्रतिपादयत।

३ सुवर्णस्य पार्थिवत्वं निराकुरुत।

**प्रश्न ४ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ न्यायदर्शनरीत्या सृष्टेः उत्पत्तिक्रमं लिखत।

२ न्यायदर्शनरीत्या ईश्वरविषयकमनुमानं संसाध्य ईश्वरसिद्धिं प्रतिपादयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिखत।** **१०**

१ पाकजापाकजस्य वर्णनं क्रियताम्।

२ शब्दलक्षणं विशदयत।

३ अयथार्थानुभवं यथाग्रन्थं वितनुत।

**प्रश्न ६ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

१ त्रिविधकारणस्वरूपं निबध्नीत।

२ षड्विधसन्निकर्षान् विशदयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** **१०**

१ द्रव्याणि कति सन्ति, कानि च तानि?

२ विशेषाः के , कति च ते?

३ पार्थिवो विषयः कः?

४ जलीयं शरीरं कुत्र अस्ति?

५ दिव्यं तेजः किम्?

६ वायोः लक्षणं किम्?

७ आकाशस्य लक्षणं किम्?

८ रूपं कतिविधं , के च ते भेदाः?

९ परिमाणस्य किं लक्षणम्?

१० परत्वं कुत्र तिष्ठति?

११ बुद्धेः ज्ञानस्य वा किं लक्षणम्?

१२ यथार्थानुभवस्य उदाहरणं किम्?

१३ यथार्थानुभवः कतिविधः?

१४ न्यायदर्शनस्य प्रणेता कः?

१५ तर्कसंग्रहः केन रचितः?